“जन्माधाने निधनभे प्रत्यरौ च विपत्करे ।
यदि व्याधिः समुत्पन्नः क्लेशाय मरणाय वा ॥
कृत्तिकासु यदा व्याधिर्नृणाञ्च प्रतिपद्यते ।
नवरात्रं भवेत् पीड़ा त्रिरात्रं रोहिणीषु च ॥
मृगशीर्षे पञ्चरात्रमार्द्रायां मुच्यतेऽसुभिः ॥
पुनर्व्वसौ तथा पुष्ये सप्तरात्रं विधीयते ।
नवरात्रं तथाश्लेषे मासमेकं मघासु च ॥
द्वौ मासौ पूर्व्वफल्गुन्यामुत्तरासु त्रिपक्षकम् ।
हस्तेषु सप्तमे मोक्षश्चित्रायामर्द्धमासकम् ॥
मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिम् ।
मैत्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम् ॥
मूले न जायते मोक्षः पूर्व्वाषाढ़े त्रिपक्षकम् ।
उत्तरा दिनविंशत्या श्रवणे द्वौ च मासकौ ॥
धनिष्ठायामर्द्धमासं वारुण्याञ्च दशाहकम् ।
न च भाद्रपदे मोक्ष उत्तरासु त्रिपक्षकम् ॥
रेवत्यां दिनविंशत्या चाहोरात्रं तथाश्विनी ।
प्राणैर्व्विमुच्यते नित्यं भरण्यां नात्र संशयः ॥
कौशिकेन सदादिष्टा नक्षत्रव्याधिसम्भवाः ।
नक्षत्रे प्रतिकर्त्तव्यं नक्षत्रपथजानता ॥”

नक्षत्रचतुर्भागबोधकानि चत्वारि नामाद्यक्षराणि यथा । चु चे चो ल १ । लि लु ले लो २ । अ इ उ ए ३ । ओ व वि वु ४ । वे वो क कि ५ । कु घ ङ छ ६ । के को ह हि ७ । हु हे हो ड ८ । डि डु डे डो ९ । म मि मु मे १० । मो ट टि टु ११ । टे टो प पि १२ । पु ष ण ठ १३ । पे पो र रि १४ । रु रे रो त १५ । ति तु ते तो १६ । न नि नु ने १७ । नो य यि यु १८ । ये यो भ भि १९ । भु ध फ ढ २० । भे भो ज जि २१ । जु जे जो ख । अभिजित् । खि खु खे खो २२ । ग गि गु गे २३ । गो श शि शु २४ । शे शो द दि २५ । दु थ झ ञ २६ । दे दो च चि २७ । ऋ ऌ युक्ताकारयुक्तेन ज्ञेयः । ह्रस्वेन दीर्घो ज्ञेयः । तालव्यशकारेण दन्त्यसकारो ज्ञेयः ।” इति ज्योतिस्तत्त्वम् ॥

नक्षत्रकान्तिविस्तारः, पुं, (नक्षत्राणां कान्तिस्तस्या विस्तारो यत्र ।) धवलयावनालः । इति राजनिर्घण्टः ॥

नक्षत्रचक्रं, क्ली, (नक्षत्राणां चक्रं यत्र ।) मन्त्रग्रहणोक्तषट्चक्रान्तर्गतचक्रविशेषः । तथा च बृहच्छ्रीक्रमे ।
“उत्तराद्दक्षिणाग्रान्तु रेखां कुर्य्याच्चतुष्टयीम् ।
दश रेखाः पश्चिमाग्राः कर्त्तव्या वीरवन्दिते ! ॥
अकारादिक्षकारान्तान् द्विचन्द्रवह्निवेदकान् ।
भूमीन्दुनेत्रचन्द्रांश्च अश्लेषान्तं खगौ प्रिये ! ॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्दुनेत्राब्धिचन्द्रकान् ।
मघादिज्येष्ठपर्य्यन्तं द्वितीयं नवतारकम् ॥
वह्निभूमीन्दुचन्द्रांश्च युग्मेन्दुनेत्रवह्निकान् ।
वेदेन भेदिता वर्णा रेवत्यंशगताः क्रमात् ॥”
निबन्धे ।
“पूर्व्वोत्तरात्रयश्चैव भरण्यार्द्रा च रोहिणी ।
इमानि मानुषाख्याहुर्नक्षत्राणि मनीषिणः ॥
ज्येष्ठा शतभिषामूलाधनिष्ठाश्लेषकृत्तिकाः ।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः ॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः ।
अनुराधा मृगशिरः श्रवणा देवतारकाः ॥”
तथा ।
“स्वजातौ परमा प्रीतिर्म्मध्यमा भिन्नजातिषु ।
रक्षोमानुषयोर्न्नाशो वैरं दानवदेवयोः ॥”
गणापवादमाह गवाक्षतन्त्रे ।
“प्रणवश्चाग्रक्षरी माया व्योमव्यापी षड़क्षरः ।
प्रासादो बहुरूपी च सप्त साधारणाः स्मृताः ॥”
शारदायाम् ।
“जन्म सम्पत् विपत् क्षेमः प्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः ॥”
जन्मत्रिपञ्चसप्तानि वर्ज्जनीयानि नक्षत्राणि । तथा च राघवभट्टः ।
“रसाष्टनवभद्राणि युगयुग्मगतान्यपि ।
इतराणि न भद्राणि नक्षत्राणि ॥” स्वनक्षत्रादेव नक्षत्रं गणनीयम् । तदज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्राद्गणनीयम् । तथा च ।
“प्रादक्षिण्येन गणयेत् साधकाद्यक्षरात् सुधीः ॥”
इति तन्त्रसारः ॥

नक्षत्रनेमिः पुं, (नक्षत्रस्य नक्षत्रचक्रस्य नेमिरिव ।) विष्णुः । यथा, (महाभारते । १३ । १४९ । ६० ।)
“नक्षत्रनेमिर्न्नक्षत्री क्षमः क्षामः समीहनः ॥”
“नक्षत्रैस्तारकैः सार्द्धं चन्द्रसूर्य्यादयो ग्रहाः ।
वायुपाशमयैर्बन्धैर्न्निबद्धा ध्रुवसंज्ञितैः ॥
स ज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे ध्रुवस्तस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तकः स्थितो विष्णुरिति नक्षत्रनेमिः शिशुमारवर्णने विष्णुर्हृदयमिति स्मृतेः ॥” इति शाङ्करभाष्यम् ॥) चन्द्रः । ध्रुवः । रेवत्यां स्त्री । इति मेदिनी । मे, ६३ ॥

नक्षत्रपः, पुं, उडुपः । चन्द्रः । नक्षत्रं पातीति व्युत्पत्त्या । (नक्षत्र + पा + कः ॥)

नक्षत्रपुरुषः, पुं, (नक्षत्रैः पुरुष इव ।) व्रतविशेषः । यथा,—
“श्रूयतां कथयिष्यामि नक्षत्रपुरुषव्रतम् ।
नक्षत्राङ्गाणि देवस्य यानि यानीह नारद ! ॥
मूलर्क्षं चरणौ विष्णोर्जङ्घे द्वे रोहिणी स्थिता ।
द्वे जानुनी तथाश्विन्यौ संस्थिते रूपधारिणः ॥
आषाढ़े द्वे तथा चोरू गुह्यस्थं फल्गुनीद्वयम् ।
कटिस्थाः कृत्तिकाश्चैव वासुदेवस्य संस्थिताः ॥
प्रोष्ठपदाद्वयं पार्श्वं कुक्षिभ्यां रेवती स्थिता ।
उरःसंस्था त्वनुराधा श्रविष्ठा पृष्ठसंस्थिता ॥
विशाखा भुजयोर्हस्तः करद्वयमुदाहृतम् ।
पुनर्व्वसुरथाङ्गुल्यो नखाः सर्व्वं तथोच्यते ॥
ग्रीवास्थिता तथा ज्येष्ठा श्रवणः कर्णयोः स्थितः ।
मुखसंस्थस्तथा पुष्यः स्वातिर्दन्ताः प्रकीर्त्तिताः ॥
हनू द्वे वारुणश्चोक्तो नासा पैत्रमुदाहृतम् ।
प्राजापत्यञ्च नेत्राभ्यां रूपधाम्नः प्रतिष्ठितम् ॥
शिरो रौद्रस्तथा चैव नक्षत्राङ्गमिदं हरेः ।
विधानं संप्रवक्ष्यामि यथायोगेन नारद ! ॥
संपूजितो हरिः कामान् विदधाति यथेप्सितान् ।
चैत्रे मास्यसिताष्टम्यां यदा मूलगतः शशी ॥
भगवन्तं सह लक्ष्म्या पूजयेच्च विधानतः ।
नक्षत्रसन्निधौ दद्याद्विप्रेन्द्राय च भोजनम् ॥
जानुनी चाश्विनीयोगे पूजयेदथ भक्तितः ।
दोहदे च हविष्यान्नं पूर्व्ववद्द्विजभोजनम् ॥
आषाढ़ाभ्यां तथा द्वाभ्यां द्वावूरू पूजयेद्बुधः ।
सलिलं शिशिरं तत्र दोहदे च प्रकीर्त्तितम् ॥
फल्गुनीद्वितये गुह्यं पूजनीयं विचक्षणः ।
दोहदे च पयो गव्यं देयञ्च द्विजभोजनम् ॥
कृत्तिकासु कटिः पूज्या सोपहारैर्ज्जितेन्द्रियैः ।
देयञ्च दोहदे विष्णोः सुगन्धिकुसुमोदकम् ॥
पार्श्वे भाद्रपदायुग्मे पूजयित्वा विधानतः ।
गुड़ं सशालिकं दद्याद्दोहदे देवप्रीतिदम् ॥
द्वे कुक्षी रेवतीयोगे दोहदे मुद्गमोदकम् ।
अनुराधासु जठरं कुलत्थांस्तत्र दोहदे ॥
श्रविष्ठायां तथा पृष्ठं शालिभक्तञ्च दोहदे ।
पुष्ये मुखं पूजयेत दोहदे घृतपायसम् ॥
स्वातियोगे च दशनान् दोहदे तिलशष्कुली ।
भुजयुग्मं विशाखासु दोहदे परमोदनम् ॥
हस्ते हस्तौ तथा पूज्यौ यावकं दोहदे स्मृतम् ।
पुनर्व्वसावङ्गुलीश्च पटोलं तत्र दोहदे ॥
दातव्यं केशवप्रीत्यै ब्राह्मणस्य च भोजनम् ।
हनू शतभिषायां वै पूजयेत्तु प्रयत्नतः ॥
प्रियङ्गुरक्तशाल्यन्नं दोहदञ्च मधुद्विषः ।
मघासु नासिका पूज्या मधु दद्याच्च भोजनम्
मृगोत्तमाङ्गे नयने मृगमांसञ्च दोहदे ।
चित्रायोगे ललाटञ्च दोहदे चारु भोजनम् ॥
भरणीषु शिरः पूज्यं चारु भक्तञ्च दोहदे ।
सम्पूजनीया विद्वद्भिरार्द्रायोगे शिरोरुहाः ॥
विप्रांश्च भोजयेद्भक्त्या दोहदे च गुड़ार्द्रकम् ।
नक्षत्रयोगेष्वेतेषु संपूज्य जगतः पतिम् ॥
ततस्तु दक्षिणां दद्यात् स्त्रीपुंसोश्चारु वाससम्
छत्रोपानद्युगञ्चैव सप्त धान्यानि काञ्चनम् ॥
घृतपात्रञ्च गां दोग्ध्रीं ब्राह्मणाय निवेदयेत् ।
प्रतिनक्षत्रयोगेन पूजनीया द्विजातयः ॥
नक्षत्रज्ञाय विप्राय पृथग्दद्याच्च दक्षिणाम् ।
नक्षत्रपुरुषाख्यं हि व्रतानां व्रतमुत्तमम् ॥
एवं विधानतो ब्रह्मन् ! नक्षत्राङ्गो जनार्द्दनः ।
पूजितो रूपधारी यैस्तैः प्राप्ता च सुकामिता ॥
एतत्तवोक्तं परमं पवित्रं
धन्यं यशस्यं शुभरूपदायि ।
नक्षत्रपुंसः परमं विधानं
शृणुष्व पुण्यामिह तीर्थयात्राम् ॥”
इति वामनपुराणे ७७ अध्यायः ॥

नक्षत्रमाला, स्त्री, (नक्षत्रसंख्यका माला ।) सप्तविंशतिमौक्तिककृतहारः । इत्यमरः । २ । ६ । १०६ ।
“सप्तविंशतिरूपाढ्यै रूपकै रूपरूपकैः ।
नृत्ये नक्षत्रमाला स्यान्मुक्तावलिरिवोज्ज्वला ॥”
इति सङ्गीतदामोदरः ॥
(नक्षत्राणां माला समूहः ।) नक्षत्रश्रेणी ।